
## प्रार्थना । (केवलं कण्ठस्थीकरणार्थम्)



**करदर्शनम् –** कराग्रे वसते लक्ष्मीः
करमध्ये सरस्वती ।
करमूले तु गोविन्दः
प्रभाते करदर्शनम् ।।





**क्षमाप्रार्थना –** समुद्रवसने देवि
पर्वतावलिभूषिते ।
विष्णुपत्नि नमस्तुभ्यं
पादस्पर्शं क्षमस्व मे ।।



**सूर्यनमस्कारः–**ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ।।




**भोजनमन्त्रः–** सततमशनकाले मातृभूमिं स्मरेयम्
जय जय जननि त्वं मुक्तकण्ठं वदेयम् ।
हितदसुखदमन्नं प्रत्यहं भक्षयेयम्
भवतु बलसमृद्धं राष्ट्रभक्त्यै शरीरम् ।।




**दीपस्तुतिः –** दीपज्योतिः परब्रह्म दीपज्योतिर्जनार्दनः ।
दीपो हरति पापानि सन्ध्यादीप नमोऽस्तुते ।।


**शान्तिमन्त्रः –**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।।


## उपयुक्तवस्तूनि ।


पिहितपत्रम्


योजिनी



सन्दंशः



सञ्चिका


मृदुमुद्रा





मूल्याङ्कः



रन्ध्रिका


सान्द्रमुद्रिका


संश्लेषपट्टिका


विद्युत्कोषः



स्मृतिशलाका


तन्त्रीः



दृश्यफलकम्



अक्षरफलकम्


पाथेयपात्रम्


वस्त्रसूचिः


## वस्त्राणि ।


ऊरुकम्



अर्धोरुकम्



युतकम्


पादस्यूतः



धौतवस्त्रम्


शाटिका


राङ्कवम्



स्वेदकः

## खाद्यपदार्थाः ।


रोटिका


शाकम्


सूपः


अवलेहः


पर्पटम्


ओदनम्


पायसम्


कुण्डलिका

## रुचयः ।



आम्ला



कटुः



तिक्तम्



कषायम्



मधुरा




लवणम्


# क्रियाः ।



स्थगयति




पिद्धाति




उद्घाटयति



निमीलयति




ज्वालयति




निर्वापयति



ददाति/यच्छति



गृह्णाति



माति



अन्विष्यति




परीक्षते




चिनोति




मर्दयति




वेल्लयति




भर्जयति




परिवेषयति





सङ्कलयति




व्यवकलयति





गुणयति





भाजयति







पञ्चवादनम्
०५.००




पञ्चाधिक–पञ्चवादनम्
०५.०५




दशाधिक–पञ्चवादनम्
०५.१०




सपाद–पञ्चवादनम्
०५.१५




विंशत्यधिक–पञ्चवादनम्
०५.२०




पञ्चविंशत्यधिक–पञ्चवादनम्
०५.२५



सार्ध–पञ्चवादनम्
०५.३०




पञ्चत्रिंशदधिक–पञ्चवादनम्
०५.३५




चत्वारिंशदधिक–पञ्चवादनम्
०५.४०



पादोन–षड्वादनम्
०५.४५



दशोन–षड्वादनम्
०५.५०



पञ्चोन–षड्वादनम्
०५.५५

## कक्षायाः सोमवासरस्य समयसरणिः ।

(समयसरणिम् उपयुज्य वाक्यानि वदत)

| तासिका | समयः | विषयः |
|---|---|---|
| ० | १२.२० तः १२.३० | प्रार्थना |
| १ | १२.३० तः ०१.१० | मराठीभाषा |
| २ | ०१.१० तः ०१.४५ | गणितम् |
| ३ | ०१.४५ तः ०२.२० | संस्कृतभाषा |
| ४ | ०२.२० तः ०२.५५ | विज्ञानम् |
| | ०२.५५ तः ०३.२५ | मध्य-विरामः |
| ५ | ०३.२५ तः ०४.०० | इतिहासः |
| ६ | ०४.०० तः ०४.३५ | आङ्ग्लभाषा |
| ७ | ०४.३५ तः ०५.१० | भूमितिः |
| ८ | ०५.१० तः ०५.४० | शारीरिकशिक्षणम् |

## दशमीकक्षायाः छात्राणां कृते अभ्यासनियोजनम् ।
## स्वयमध्ययनसमयतालिका ।

| क्रमाङ्कः | विषयः | समयः | अङ्कैः लिखत |
|---|---|---|---|
| १ | गणितम् | प्रातःकाले सार्धपञ्चवादनतः दशाधिकषड्वादनपर्यन्तम्। | |
| २ | मराठीभाषा | प्रातःकाले विंशत्यधिक-अष्टवादनतः दशाधिकनववादनपर्यन्तम् । | |
| ३ | विज्ञानम् | प्रातःकाले सार्धनववादनतः सपाद-दशवादनपर्यन्तम् । | |
| ४ | संस्कृतभाषा | प्रातःकाले पञ्चविंशत्यधिक-दशवादनतः एकादशवादनपर्यन्तम् । | |
| ५ | सा. शास्त्रम् | सायङ्काले दशाधिक-सप्तवादनतः दशोन-अष्टवादनपर्यन्तम् । | |
| ६ | आङ्ग्लभाषा | रात्रौ दशाधिक-अष्टवादनतः पादोन-नववादनपर्यन्तम् । | |

### क्रीडत-नन्दत

**सङ्ख्याक्रीडा**

एकं द्वे त्रीणि... इति क्रमेण सर्वे मिलित्वा शतपर्यन्तं सङ्ख्याः वदेयुः । ततः पुनः तदेव आवर्तनीयम्। परन्तु अस्मिन् अवसरे सर्वाः विषमसङ्ख्याः शिक्षकः एव वदेत् । छात्रैस्तु केवलं समसङ्ख्याः वक्तव्याः। अग्रिमे आवर्तने शिक्षकः समसङ्ख्याः वदेत्, बालाश्च विषमसङ्ख्याः वदेयुः । एतेन सङ्ख्याभ्यासः सुष्ठु भवति।

**सङ्ख्यालेखनम्**

छात्राणां गणद्वयं करणीयम् । शिक्षकस्य समीपे कृष्णफलकं भवेत् । शिक्षकः यदा सूचयति तदा प्रतिगणम् एकः क्रीडकः अग्रे आगत्य कृष्णफलकस्य पुरतः तिष्ठेत्। शिक्षकः संस्कृतेन काञ्चित् सङ्ख्यां वदेत् । तौ शीघ्रातिशीघ्रं तां सङ्ख्यां कृष्णफलके लिखेताम् । यः आदौ लिखति तस्मै गणाय एकः अङ्कः दातव्यः । (सङ्ख्यां देवनागरीलिप्या रोमन्-लिप्या वा लेखितुम् अर्हन्ति ।) - क्रीडावल्ली-पुस्तकात् ।

# पुनःस्मारणम् तथा अभ्यासः ।



## १. सङ्ख्याः ।

**क) सङ्ख्याः अङ्कैः लिखत ।**

षट्त्रिंशत्, नवसप्ततिः, सप्तनवतिः, त्र्यशीतिः, पञ्चदश
त्रिचत्वारिंशत्, त्रयस्त्रिंशत्, द्विषष्टिः, षण्णवतिः, चतुरशीतिः ।

**ख) सङ्ख्याः अक्षरैः लिखत ।**

१६, ७५, २३, ५६, ६, १००,
८०, ४४, ६७, ९३

**ग) सङ्ख्याः अक्षरैः लिखत ।**

२, १२, २२, ३२, ४२, ५२,
६२, ७२, ८२, ९२

**घ) सङ्ख्याः अक्षरैः लिखत ।**

८, १८, २८, ३८, ४८, ५८,
६८, ७८, ८८, ९८

## २. लकारं लिखत ।

१) तत्प्राप्तुं यतस्व । = **लोट्लकारः**
२) अहं प्रसन्ना भविष्यामि । = ...........
३) काकः उपादिशत् । = ................
४) सः मृगं बन्धनात् व्यमुञ्चत् । = ...........
५) मित्र छिन्धि मम बन्धनम् । = ...........
६) स मूल्यं मह्यं दद्यात् । = ...........
७) आत्मा कृतार्थतां लभताम् । = ...........
८) त्वं रचनां द्रष्टुं शक्नोषि । = ...........
९) आचार्यः तं प्रणनाम । = ...........
१०) वयं वृत्त्यर्थं कार्यरताः स्याम । = .........

## ३. त्वान्तं/ल्यबन्तम् अव्ययं निष्कासयत ।

**यथा**

क. वीरेन्द्रः **खेलित्वा** गृहम् आगच्छत् ।

खेलित्वा → खेल् (१प.प.)+ क्त्वा; आगच्छत् → लङ्लकारः प्र.पु.ए.व.

वीरेन्द्रः **अखेलत्** गृहम् आगच्छत् **च** ।

अखेलत् → लङ्लकारः प्र.पु.ए.व.; आगच्छत् → लङ्लकारः प्र.पु.ए.व.

२. अहं गणेशं **प्रणम्य** मोदकं खादामि।

प्रणम्य → प्र+नम् (१प.प.) ल्यबन्त; खादामि → लट्लकारः उ.पु.ए.व.

अहं गणेशं **प्रणमामि** मोदकं खादामि **च**।

प्रणमामि → लट्लकारः उ.पु.ए.व.; खादामि → लट्लकारः उ.पु.ए.व.

१) छात्राः स्नात्वा शालां गच्छन्तु ।
२) त्वं प्रातराशं कृत्वा औषधं पिबेः ।
३) मानसी श्लोकम् उदित्वा उपाविशत् ।
४) महिला नर्तित्वा गायति ।

१) अहं पुष्पाणि विचित्य मालां गुम्फामि ।
२) अर्णवः गुरुम् उपगम्य नम्रतया अवदत् ।
३) नरः सम्यक् वीक्ष्य कार्यं कुर्यात् ।
४) यूयं कार्याणि प्रारभ्य पूर्णतां नयत ।

## ४. स्म निष्कासयत । यथा

मृगः काकः च **निवसतः स्म** । **न्यवसताम्** ~~स्म~~ ।

निवसतः स्म → नि + वस् (१प.प.) लट्लकारः प्र.पु.द्वि.व

न्यवसताम् → नि + अवसताम् इ + अ = य लङ्लकारः प्र.पु.द्वि.व

चन्द्रः **राजते स्म** । **अराजत** ~~स्म~~ ।

राजते स्म → राज् (१आ.प.) लट्लकारः प्र.पु.ए.व

अराजत → राज् (१आ.प.) लङ्लकारः प्र.पु.ए.व

१) प्रजाः पशुवत् जीवन्ति स्म ।
२) माता पुत्रस्य पालनं करोति स्म ।
३) माता पुत्रस्य विवाहविषये चिन्तयति स्म ।
४) स्तुतिगायकाः प्रसन्नाः भवन्ति स्म ।

५. **लकारं परिवर्तयत । यथा –**

त्वं धनुः **त्यज** । (लट् लकारे) → **त्यजसि**

| त्यज् (१प.प.) लोटलकारः म.पु.ए.व | त्यज् (१प.प.) लट्लकारः म.पु.ए.व |
|---|---|

सः **व्यमुञ्चत्** । (विधिलिङ्लकारे) → **विमुञ्चेत्**

| वि + मुच्-मुञ्च् (६प.प.) इ + अ = य लङ्लकारः प्र.पु.ए.व | वि + मुच्-मुञ्च् (६प.प.) विधिलिङ्लकारः प्र.पु.ए.व |
|---|---|

१) अहं प्रसन्ना भविष्यामि । (विधिलिङ्)
२) जनाः धान्यबीजानि अवपन् । (लोट्)
३) सर्वे प्रजाजनाः सन्तुष्टाः अभवन् । (लृट्)
४) शृगालः मृगेण सह मित्रताम् ऐच्छत् । (लट्)
५) मे आत्मा कृतार्थतां लभताम् । (विधिलिङ्)
६) ग्रन्थालये नैकानि पुस्तकानि सन्ति । (लङ्)
७) सः अचिन्तयत् । (लोट्)
८) शिशिर-ऋतौ तडागे कमलं व्यकसत् । (लट्)

६. **वचनं परिवर्तयत ।**

यथा– चारणाः स्तुतिं गायन्ति । (एकवचने)

**चारणः** स्तुतिं **गायति** ।

१) मृगः सस्यम् अखादत् । (बहुवचने)

........ सस्यम् ........ ।

२) जनाः न सन्तुष्टाः । (एकवचने)

........ न ........ ।

३) धेनुः मञ्चे आगच्छति । (द्विवचने)
४) कर्षकः बीजात् फलं लभते । (बहुवचने)
५) सः गृहात् निरगच्छत् । (बहुवचने)
६) ते शिष्याः उच्चैः अवदन् । (द्विवचने)
७) सा पुस्तकं पठितुं प्रारभते । (बहुवचने)
८) अहं रथात् अवतरामि । (द्विवचने)
९) त्वं इमं तण्डुलं विभज । (बहुवचने)

७. **'भवान्' स्थाने 'त्वम्'/'त्वं' स्थाने 'भवान्' योजयत ।**

| सर्वनाम | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| युष्मद् | त्वम् | युवाम् | यूयम् | मध्यम-पुरुषः |
| भवत् | भवान्/भवती | भवन्तौ/भवत्यौ | भवन्तः/भवत्यः | प्रथम-पुरुषः |

यथा – **त्वम्** तण्डूलान् **आनय** । → **भवान्** तण्डूलान् **आनयतु** ।

८. **कारकपरिचयं कुरुत ।**

| विभक्तिः | कारकम् | विभक्तिः | कारकम् |
|---|---|---|---|
| प्रथमा | कर्ता | चतुर्थी | सम्प्रदानम् |
| द्वितीया | कर्म | पञ्चमी | अपादानम् |
| तृतीया | करणम् | सप्तमी | अधिकरणम् |

यथा– कवयः काव्यानि रचयन्ति । (कारकम्-कर्ता)

१. हरिः लेखनीं यच्छति ।
२. वृक्षात् फलं पतति ।
३. बालाः कन्दुकेन क्रीडन्ति ।
४. वने व्याघ्रः वसति ।
५. माता बालकाय मोदकं यच्छति ।

९. **प्रातिपदिकं लिखत ।**


यथा– नर्तक्यौ-नर्तकी । तस्य-तद् (पुं./नपुं.)
विष्णवे-विष्णु । इयम्-इदम् (स्त्री.)


| नामानि | सर्वनामानि |
|---|---|
| क्षत्रियाणाम्, अग्नौ, रज्ज्वा, नायिकया, सरस्वत्यै, गुणिनः, संन्यासिनः, नद्याम्, अध्वना, भस्म, वस्तुभ्याम्, भ्रातरौ, पशुभिः, दुर्वाससा, उषसि, मह्याम्, वारिणि, रिपुषु, पन्थाः, शक्तिमान्, | तेषाम्, मत्, सा, सर्वेभ्यः, अस्याः, अयम्, युवयोः, एतस्मिन्, कया, यस्मै, ताभिः, सर्वस्मात्, अनयोः, भवत्याः, भवन्तौ, मह्यम् |



# आद्यकृषकः पृथुवैन्यः ।

ऋग्वेदात् एषा कथा उद्धृता (ऋ.१०.९३.१४) । वेनभूपतेः पुत्रः वैन्यः एव पृथुवैन्यः इति नाम्ना ज्ञातः । सः प्रजाहितदक्षः आदर्शः सम्राट् इति स्मृतः। भारतदेशे पृथुना एव कृषिकार्यं प्रारब्धं, संशोधितं, विकासं प्रति नीतं च। स एव कृषिविद्यायाः जनकः इति मतः। अत एव सः प्रथमः कृषकः। धरित्र्याः 'पृथिवी' इति नामाभिधानं पृथोः कार्यस्य स्मारकम्' इति मन्यते बुधैः।



भूपालः पृथुवैन्यः नाम धरायां प्रथमः अभिषिक्तः सम्राट् । प्रयागक्षेत्रे पृथुनृपस्य राजधानी आसीत्। राज्याभिषेकसमये चारणाः पृथुनृपस्य स्तुतिं गातुमुत्सुकाः। तदा पृथुः आज्ञापयत्, ''तिष्ठन्तु चारणाः ! यावत् मम सद्गुणाः न प्रकटीभवन्ति तावदहं न स्तोतव्यः। स्तवनं तु ईश्वरस्यैव भवेत्।'' स्तुतिगायकाः पृथुनृपस्य एतादृशीं निःस्पृहतां ज्ञात्वा प्रसन्नाः अभवन्।

एकदा पृथुराजः स्वराज्ये भ्रमणम् अकरोत् । भ्रमणसमये तेन दृष्टं यत् प्रजाः अतीव कृशाः अशक्ताश्च । ताः प्रजाः पशुवज्जीवन्ति । निकृष्टान्नं खादन्ति । तद् दृष्ट्वा राजा चिन्ताकुलः जातः । तदा पुरोहितोऽवदत्, ''हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुतः वसुन्धरायाः उदर एव वर्तते । तत्प्राप्तुं यतस्व ।''




तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, ''हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि । त्वं तु प्रजाहितदक्षः नृपः । यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज । खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।''

भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत्। वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत्। भूमिम् उर्वरतमां कर्तुं प्रायतत। तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण

अकरोत्। अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत् । पर्जन्यानन्तरं बीजेभ्य: अङ्कुरा: उद्भूता:। धान्यलाभेन सर्वे प्रजाजना: सन्तुष्टा: च अभवन्। एष: कल्याणकारी नृप: पृथिव्यां प्रशासने अग्रणी: जनसेवाव्रती च अभवत्।

### पृथुवैन्यस्य आदर्शभूतानि कार्याणि ।




## भाषाभ्यास:

**१. पूर्णवाक्येन उत्तरं लिखत।**

अ) चारणा: किमर्थम् उत्सुका:?     आ) भ्रमणसमये पृथुराजेन किं दृष्टम्?

इ) वसुन्धराया: उदरे किं वर्तते?     ई) स्त्रीरूपं धृत्वा पृथुनृपस्य पुरत: का प्रकटिता अभवत्?


उ) पृथुवैन्य: कृषिकार्यार्थं जलस्य व्यवस्थापनं कथम् अकरोत्?

**२. माध्यमभाषया उत्तरत।**


अ) भूमाता पृथुवैन्यं किम् उपादिशत्?  आ) धरित्र्या: उपदेशं मनसि निधाय पृथुवैन्य: किं किम् अकरोत्?

**३. जालरेखाचित्रं पूरयत ।**


अ)





आ)




इ)




**४. पाठ्यांशं पठित्वा प्रवाहिजालं पूरयत ।**



**५. प्रश्ननिर्माणं कुरुत ।**

अ) प्रयागक्षेत्रे पृथुराजस्य राजधानी आसीत् । आ) प्रजा: पशुवत् जीवन्ति ।

इ) धनधान्यादि सर्वं वस्तुजातं वसुन्धराया: उदर एव वर्तते ।

ई) पर्जन्यानन्तरं बीजेभ्य: अङ्कुरा: उद्भूता: ।

**६. सूचनानुसारं कृती: कुरुत ।**

अ) पृथुवैन्यस्य नि:स्पृहतां ज्ञात्वा स्तुतिगायका: प्रसन्ना: अभवन् । (पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत ।)

आ) त्वं प्रयत्नेन कृषिकार्यं करोषि । ('त्वं' स्थाने 'भवान्' योजयत ।)

इ) त्वं धनु: त्यज । ('त्वं' स्थाने 'भवान्' योजयत ।)

ई) भूमातु: उपदेशं मनसि निधाय पृथुवैन्य: कृषिकार्यम् अकरोत् । ('भूमातु:' स्थाने 'भूमि' शब्दस्य योग्यं रूपं लिखत ।)

उ) प्रजाजनै: सह कृषिकार्यं कुरु । (लकारं लिखत ।)

ऊ) अहं प्रसन्ना भविष्यामि । (लृट् स्थाने लिङ् प्रयोगं कुरुत ।)

ए) भूमि: स्त्रीरूपं धृत्वा तस्य पुरत: प्रकटिता अभवत् । (पूर्वकालवाचक-त्वान्त-अव्ययं निष्कासयत ।)

**७. मेलनं कुरुत ।**

| **विशेषणम्** | कृशा: | उर्वरा | आनन्दिता: | दु:शासक: | प्रजाहितदक्ष: |
|---|---|---|---|---|---|
| **विशेष्यम्** | पृथु: | वेन: | प्रजा: | भूमि: | प्रजाजना: |

**८. समानार्थकशब्दं लिखत ।** वृक्ष:, भूमि:, राजा, धनु:, नदी ।

**९. विरुद्धार्थकशब्दं लिखत ।** स्तुति: , सद्गुणा:, प्रसन्ना:, अशक्ता:, पुरत:, कृशा: ।

**१०. क: कं वदति ?**

अ) तिष्ठन्तु चारणा: । आ) तत्प्राप्तुं यतस्व । इ) तव पिता दु:शासक: । ई) अत: धनु: त्यज ।

**११. सन्धिविग्रहं कुरुत ।** अ) उदर एव आ) पशुवज्जीवन्ति इ) अशक्ताश्च ई) पुरोहितोऽवदत् ।

**१२. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

अ) भूमि: स्त्रीरूपं धृत्वा प्रकटिता ।

आ) भूपाल: पृथुवैन्य: नाम धराया: प्रथम: अभिषिक्त: सम्राट् ।

**क्रीडत-नन्दत ।** **अनन्त्यवाक्यरचना**

प्रथम: बाल: एकस्य शब्दस्य कथनेन कस्यचित् वाक्यस्य आरम्भं कुर्यात् । द्वितीय: बाल: प्रथमेन बालकेन उक्तं शब्दम् उच्चार्य तस्य वाक्यस्य अनुवर्तनरूपेण स्वयमपि एकं शब्दं योजयेत् । तृतीय: तृतीयम् । चतुर्थ: चतुर्थम् एवम् अग्रेऽपि । परन्तु कोऽपि वाक्यस्य समाप्तिं न कुर्यात् । य: तथा करोति स: गणात् बाह्य: भवति । उदा. - - - १. कस्मिंश्चित् - - - २. कस्मिंश्चित् ग्रामे - - - ३. कस्मिंश्चित् ग्रामे कश्चन - - - ४. कस्मिंश्चित् ग्रामे कश्चन कृपण: - - -
अत्र 'आसीत्' इति यदि उच्यते तर्हि वाक्यं समाप्तं भवति । य: तत् कथयति स: बाह्य: भवति । अत: स: केनापि प्रकारेण वाक्यम् अग्रेऽपि अनुवर्तयितुं प्रयत्नं कुर्यात् शिक्षक: किञ्चित् साहाय्यं कर्तुम् अर्हति । **- क्रीडावली-पुस्तकात् ।**

6T2JYG